# shrIhanumataH laghupUjAkramaH

# શ્રીહનુમતઃ લઘુપૂજાક્રમઃ

## Document Information

Text title : hanumataHlaghupUjAkramaH

File name : hanumataHlaghupUjAkramaH.itx

Category : pUjA, hanumaana

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીહનુમતઃ લઘુપૂજાક્રમઃ

૧. ધ્યાનમ્ ॥

અતુલિતબલધામ સ્વર્ણશૈલાભદેહં
દનુજવનકૃશાનું જ્ઞાનિનામગ્રગણ્યમ્ ।
સકલગુણનિધાનં વાનરાણામધીશં
રઘુપતિપ્રિયભક્તં વાતજાતં નમામિ ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ - ધ્યાયામિ ॥

આગચ્છ હનુમદ્દેવ ત્વં સુવર્ચલયા સહ ।
પૂજાસમાપ્તિપર્યન્તં ભવ સન્નિહિતો મુદા ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ - આવાહયામિ ।
ભીમાગ્રજ મહાપ્રાજ્ઞ ત્વં મમાભિમુખો ભવ ।
શ્રીરામસેવક શ્રીમન્ પ્રસીદ જગતાં પતે ॥

હે સ્વામિન્, સ્થિરો ભવ, વરદો ભવ, સુમુખો ભવ, સુપ્રસન્નો ભવ ।
સ્થિરાસનં કુરુ ।
દેવ દેવ જગન્નાથ કેસરીપ્રિયનન્દન ।
રત્નસિંહાસનં તુભ્યં દદામિ હનુમત્પ્રભો ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
નવરત્નખચિતસ્વર્ણસિંહાસનં સમર્પયામિ ॥

યોગિધ્યેયાઙ્ઘ્રિપદ્માય જગતાં પતયે નમઃ ।
પાદ્યં મયાર્પિતં દેવ ગૃહાણ પુરુષોત્તમ ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
પાદયોઃ પાદ્યં સમર્પયામિ ॥

લક્ષ્મણપ્રાણસંરક્ષ સીતાશોકવિનાશન ।

ગૃહાણાર્ઘ્યં મયા દત્તં અઞ્જનાપ્રિયનન્દન ।
શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
હસ્તયોઃ અર્ઘ્યં સમર્પયામિ ॥

વાલાગ્રસેતુબન્ધાય શતાનનવધાય ચ ।
તુભ્યમાચમનં દત્તં પ્રતિગૃહ્ણીષ્વ મારુતે ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
મુખે આચમનીયં સમર્પયામિ ॥

અર્જુનધ્વજસંવાસ દશાનનમદાપહ ।
મધુપર્કં પ્રદાસ્યામિ હનુમન્ પ્રતિગૃહ્યતામ્ ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
મધુપર્કં સમર્પયાપિ ॥

ગઙ્ગાદિસર્વતીર્થેભ્યઃ સમાનીતૈર્નવોદકૈઃ ।
ભવન્તં સ્નપયિષ્યામિ કપિનાયક ગૃહ્યતામ્ ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

પીતામ્બરમિદં તુભ્યં તપ્તહાટકસન્નિભમ્ ।
દાસ્યામિ વાનરશ્રેષ્ઠ સઙ્ગૃહાણ નમોઽસ્તુ તે ॥

ઉત્તરીયં તુ દાસ્યમિ સંસારોત્તારકારણ ।
ગૃહાણ ચ મયા પ્રીત્યા દત્તં ધત્સ્વ યથાવિધિ ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
વસ્ત્રં સમર્પયામિ ।
ભૂષણાનિ મહાર્હાણિ કિરીટપ્રમુખાન્યહમ્ ।
તુભ્યં દાસ્યામિ સર્વેશ ગૃહાણ કપિનાયક ।
શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
આભરણાનિ સમર્પયામિ ॥

કસ્તૂરીકુઙ્કુમામિશ્રં કર્પૂરાગરુવાસિતમ્ ।
શ્રીચન્દનં તુ દાસ્યામિ ગૃહ્યતાં હનુમત્પ્રભો ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।

ગન્ધાન્ધારયામિ ॥

સુગન્ધીનિ સુરૂપાણિ વન્યાનિ વિવિધાનિ ચ ।
ચમ્પકાદીનિ પુષ્પાણિ કમલાન્યુત્પલાનિ ચ ॥

તુલસીદલબિલ્વાનિ મનસા કલ્પિતાનિ ચ ।
ગૃહાણ હનુમદ્દેવ પ્રણતોઽસ્મિ પદામ્બુજે ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
પુષ્પાણિ સમર્પયામિ ॥

શાલીયાનક્ષતાન્ રમ્યાન્ પદ્મરાગસમપ્રભાન્ ।
અખણ્ડાન્ ખણ્ડિતધ્વાન્ત સ્વીકુરુષ્વ દયાનિધે ॥

શ્રીસીતાસમેતશ્રીરામપાદસેવાધુરન્ધરાય હનુમતે નમઃ ।
અક્ષતાન્સમર્પયામિ ॥

અથ અઙ્ગપૂજા ॥

મારુતયે નમઃ । પાદૌ પૂજયામિ ।
સુગ્રીવસખાય નમઃ । ગુલ્ફૌ પૂજયામિ ।
અઙ્ગદમિત્રાય નમઃ । જઙ્ઘે પૂજયામિ ।
રામદાસાય નમઃ । ઊરૂ પૂજયામિ ।
અક્ષઘ્નાય નમઃ । કટિં પૂજયામિ ।
લઙ્કાદહનાય નમઃ । વાલં પૂજયામિ ।
સઞ્જીવનનગાહર્ત્રે નમઃ । સ્કન્ધૌ પૂજયામિ ।
સૌમિત્રિપ્રાણદાત્રે નમઃ । વક્ષઃસ્થલં પૂજયામિ ।
કુણ્ઠિતદશકણ્ઠાય નમઃ । કણ્ઠં પૂજયામિ ।
રામાભિષેકકારિણે નમઃ । હસ્તૌ પૂજયામિ ।
મન્ત્રરચિતરામાયણાય નમઃ । વક્ત્રં પૂજયામિ ।
પ્રસન્નવદનાય નમઃ । વદનં પૂજયામિ ।
પિઙ્ગલનેત્રાય નમઃ । નેત્રે પૂજયામિ ।
શ્રુતિપરાયણાય નમઃ । શ્રોત્રે પૂજયામિ ।
ઊર્ધ્વપુણ્ડ્રધારિણે નમઃ । લલાટં પૂજયામિ ।
મણિકણ્ઠમાલિકાય નમઃ । શિરઃ પૂજયામિ ।
સર્વાભીષ્ટપ્રદાય નમઃ । સર્વાણ્યઙ્ગનિ પૂજયામિ ।

અથ અષ્ટોત્તરશતનામપૂજા ॥

ૐ આઞ્જનેયાય નમઃ । મહાવીરાય નમઃ । તત્ત્વજ્ઞાનપ્રદાય નમઃ ।
સીતાદેવીમુદ્રાપ્રદાયકાય નમઃ । સર્વગ્રહવિનાશિને નમઃ ।
ભીમસેનસહાયકૃતે નમઃ । પરવિદ્યાપરીહારાય નમઃ ।
પરશૌર્યવિનાશકાય નમઃ । પરયન્ત્રનિરાકર્ત્રે નમઃ ।
પરમન્ત્રપ્રભેદકાય નમઃ । સર્વદુઃખહરાય નમઃ ।
સર્વલોકચારિણે નમઃ । મનોજવાય નમઃ ।
પારિજાતદ્રુમમૂલસ્થાય નમઃ । અશોકવનિકાચ્છેત્રે નમઃ ।
સર્વમાયાવિભઞ્જકાય નમઃ । સર્વબન્ધવિમોક્ત્રે નમઃ ।
રક્ષોવિધ્વંસકારકાય નમઃ । સર્વયન્ત્રાત્મકાય નમઃ ।
કપીશ્વરાય નમઃ । ૨૦
ૐ મહાકાયાય નમઃ । સર્વરોગહરાય નમઃ ।
સર્વવિદ્યાસમ્પત્પ્રદાયકાય નમઃ । કપિસેનાનાયકાય નમઃ ।
ભવિષ્યચ્ચતુરાનનાય નમઃ । કુમારબ્રહ્મચારિણે નમઃ ।
રત્નકુણ્ડલદીપ્તિમતે નમઃ । સઞ્ચલદ્વાલસન્નદ્ધલમ્બમાનાય નમઃ ।
હનુમતે નમઃ । મારુતાત્મજાય નમઃ ।
મહાબલપરાક્રમાય નમઃ । કારાગૃહવિમોક્ત્રે નમઃ ।
શૃઙ્ખલાબન્ધમોચકાય નમઃ । સાગરોત્તારકાય નમઃ ।
પ્રાજ્ઞાય નમઃ । રામદૂતાય નમઃ ।
પ્રતાપવતે નમઃ । વાનરાય નમઃ ।
લઙ્કિણીભઞ્જકાય નમઃ । શ્રીમતે નમઃ । ૪૦
ૐ સર્વમન્ત્રસ્વરૂપિણે નમઃ । સર્વતન્ત્રસ્વરૂપિણે નમઃ ।
ગન્ધમાદનશૈલસ્થાય નમઃ । લઙ્કાપુરવિદાહકાય નમઃ ।
સુગ્રીવસચિવાય નમઃ । ધીરાય નમઃ ।
શૂરાય નમઃ । દૈત્યકુલાન્તકાય નમઃ ।
સુરાર્ચિતાય નમઃ । મહાતેજસે નમઃ ।
પ્રભવે નમઃ । બલસિદ્ધિકરાય નમઃ ।
કેસરીસુતાય નમઃ । શિખોજ્જ્વલાય નમઃ ।
સીતાશોકનિવારકાય નમઃ । અઞ્જનાગર્ભસમ્ભૂતાય નમઃ ।
ગન્ધર્વવિદ્યાતત્ત્વજ્ઞાય નમઃ । લક્ષ્મણપ્રાણદાત્રે નમઃ ।
વજ્રકાયાય નમઃ । મહાદ્યુતયે નમઃ । ૬૦

ૐ ચિરજીવિને નમઃ । રામભક્તાય નમઃ ।
દૈત્યકાર્યવિઘાતકાય નમઃ । અક્ષહન્ત્રે નમઃ ।
કાઞ્ચનાભાય નમઃ । પઞ્ચવક્ત્રાય નમઃ ।
મહાતપસે નમઃ । વિજિતેન્દ્રિયાય નમઃ ।
સિંહિકાપ્રાણભઞ્જનાય નમઃ । મહારાવણમર્દનાય નમઃ ।
સ્ફટિકાભાય નમઃ । વાગધીશાય નમઃ ।
નવવ્યાકરણપણ્ડિતાય નમઃ । ચતુર્બાહવે નમઃ ।
દીનબન્ધવે નમઃ । મહાત્મને નમઃ ।
ભક્તવત્સલાય નમઃ । રામચૂડામણિપ્રદાય નમઃ ।
કામરૂપિણે નમઃ । પિઙ્ગલાક્ષાય નમઃ । ૮૦
ૐ વાર્ધિમૈનાકપૂજિતાય નમઃ । કબલીકૃતમાર્તણ્ડમણ્ડલાય નમઃ ।
બાલાર્કસદૃશાનનાય નમઃ । વિભીષણપ્રિયકરાય નમઃ ।
દશગ્રીવકુલાન્તકાય નમઃ । દાન્તાય નમઃ ।
શાન્તાય નમઃ । પ્રસન્નાત્મને નમઃ ।
શતકણ્ઠમદાપહર્ત્રે નમઃ । યોગિને નમઃ ।
રામકથાલોલાય નમઃ । સીતાન્વેષણપણ્ડિતાય નમઃ ।
વજ્રદંષ્ટ્રાય નમઃ । વજ્રનખાય નમઃ ।
રુદ્રવીર્યસમુદ્ભવાય નમઃ । સઞ્જીવનનગાહર્ત્રે નમઃ ।
શુચયે નમઃ । વાગ્મિને નમઃ ।
દૃઢવ્રતાય નમઃ । કાલનેમિપ્રમથનાય નમઃ । ૧૦૦
ૐ હરિમર્કટમર્કટાય નમઃ ।
ઇન્દ્રજિત્પ્રહિતામોઘબ્રહ્માસ્ત્રવિનિવારકાય નમઃ ।
પાર્થધ્વજાગ્રસંવાસિને નમઃ । શરપઞ્જરભેદકાય નમઃ ।
લોકપૂજ્યાય નમઃ । જામ્બવત્પ્રીતિવર્ધનાય નમઃ । મારુતયે નમઃ ।
ધૂપમાઘ્રાપયામિ । દીપં દર્શયામિ । ધૂપદીપાનન્તરં આચમનીયં
સમર્પયામિ । નૈવેદ્યં સમર્પયામિ । મધ્યે મધ્યે પાનીયં સમર્પયામિ ।
ઉત્તરાપોડશનં સમર્પયામિ । હસ્તૌ પ્રક્ષાલયામિ । પાદૌ પ્રક્ષાલયામિ ।
શુદ્ધાચમનીયં સમર્પયામિ । નીરાજનં સમર્પયામિ । નીરાજનાનન્તરં
આચમનીયં સમર્પયામિ । સુવર્ણદિવ્યમન્ત્રપુષ્પં સમર્પયામિ ।
પ્રદક્ષિણનમસ્કારાન્ સમર્પયામિ । શ્રીહનુમદર્પણમસ્તુ ।

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

*shrIhanumataH laghupUjAkramaH*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*